काव्यप्रकाशे पञ्चमतो दशमोल्लासं यावदुद्धृतानां प्राकृतपद्यानां लोकोत्तरवर्णनपरिस्फुरत्ता

डॉ.राधावल्लभशर्मा

अवगतसर्वशास्त्रहृदयोऽनुपमपण्डितो राजानकमम्मटाचार्यः काव्यप्रकाशाख्यं ग्रन्थरत्नं जग्रन्थ इति सर्वविदितोऽयं प्रसङ्गः। ग्रन्थरत्नेऽस्मिन् काव्यशास्त्रीयसिद्धान्तान् विषयांश्च समन्वयात्मिकया सरलया च शैल्या प्रत्याख्याय साहित्यविद्याधुरिणानेन विदुषा किमप्यपूर्वं कविकर्म प्राकाशि। सिद्धान्तानाममीषामुदाहरणत्वेन प्रायः प्राकृतभाषा सुष्टुतया समाश्रिता सरस्वतीसूनुनानेनेति भाषास्नेहोऽत्र संलक्ष्यते। भाषाया अस्यामहत्त्वमुररीकृत्य वाक्पतिराजो गउडवहोनामधेये ग्रन्थे इदं बभाषे -

णवमत्थ दंसणं संनिवेससिसिराओ बंधरिद्धीओ।
अविरलमिणमो आभुवनबंधमिह णबर पअम्मि॥[1]

इत्थमेव महेश्वरसूरिणाप्यवादि–

गूढत्थदेसिरहिअं सुललिअवण्णेहिं विरइअं रम्मं।
पाइयकब्बं लोए कस्स ण हिअअं सुहावेइ॥[2]

संस्कृतसरस्वत्याः सौभाग्यसीमानः एतादृशा महाकवयोऽपि प्राकृतस्याग्रे संस्कृतं गौणीकुर्वन्ति। तद्यथा–

परुसा सक्कअबन्धा पाउअबन्धो वि होइ सुउमारो।
पुरसमहिलाणँ जेत्तिअमिहन्तरं तेत्तियमिमाणम्॥[3]
ललिए महुरकखरए जुवईजणवल्लहे ससिंगारे।
सन्ते पाइअव्वे को सक्कइ सक्कअं पठिउम्।[4]

इत्थमिह प्रकाशे समुदाहृतानां प्राकृतपद्यानामनतिरसाधारणं वैशिष्ट्यं विस्तरेण तावद्वर्ण्यते। पञ्चमोल्लासे असुन्दरगुणीभूतव्यङ्ग्यस्योदाहरणं यथा–

वाणीरकुडंगुड्डीणसउणिकोलाहलं सुणन्तीए।
घरकम्मवावडाए बहुए सीअन्ति अंगाइं॥[5]

गृहपार्श्ववर्तिवेतसनिकुञ्जे दत्तसङ्केताया निकुञ्जोड्डीनपक्षिकोलाहलतर्कितनायकप्रवेशाया गुरुजन-पारतन्त्र्येण गृहकर्माणि रन्धनादौ व्यावृताया अवस्थावर्णनमिदम् ।

अत्र दत्तसङ्केतचौर्यकामुकरतसमुचितस्थानप्राप्तिर्ध्वन्यमाना वाच्यमेवोपस्कुरुते । तथा हि गृहकर्मव्यापृताया इत्यन्यपराया अपि, वध्वा इति सातिशयलज्जा पारन्त्र्यबद्धाया अपि, अङ्गानीत्येकमपि न तादृगङ्गं यद्गाम्भीर्यावहित्थवशेन संवरीतुं पारितम् । सीदन्तीत्यास्तां गृहकर्मसम्पादनं स्वात्मनमपि धर्तुं न प्रभवन्तीति । गृहकर्मयोगेन स्फुटं तथा लक्ष्यमाणानीति । अस्मादेव वाच्यात्सातिशयमदनपरव-शताप्रतीतेश्चारुत्वसम्पत्तिरिति । वस्तुतः सीदन्तीति वर्तमाननिर्देशादवसादस्याविरामः सूच्यते । तथा श्रवणसमकालं तत्कार्यस्यावसादस्यकथनरूपातिशयोक्त्या उत्कण्ठातिशयो व्यज्यते । अत्राङ्गानि सीदन्तीति वाच्याद्दत्तसंकेतो लतागहनं प्रविष्ट इति व्यङ्ग्यमस्फुटम् ।

वाच्यव्यङ्ग्ययोः विषमभेदस्योदाहरणं यथा–

कस्य वा ण होइ रोसो दट्ठूण पिआइ सव्वणं अहरं ।
सभरपडमग्धाइणि वारिअवामे सहसु एण्हिं ॥[6]

परपुरुषखण्डिताधरतया कुपिते प्रोष्यागते पत्यौ सख्या निरपराधत्वबोधनाय प्रतारणोक्ति-रियम् । अत्र वाच्यार्थबोधस्य विषयो नायिका व्यङ्ग्यार्थस्य च विषयो नायको वर्तते । अत्रायमभिप्रायः– काचिदविनीता कुतश्चित्खण्डिताधरा निश्चिततत्सविधसंनिधाने तद्भर्तरि तमनवलोकमानयेव कयाचिद्विदग्धसख्या तद्वाच्यतापरिहारायैवमुच्यते । सहस्वेदानीमिति वाच्यमविनयवतीविषयम् । भर्तृविषयं तु– अपराधो नास्तीत्यवेद्यमानं व्यङ्ग्यम् । सहस्वेत्यपि च तद्विषयं व्यङ्ग्यम् । तस्यां च प्रियतमेन गाढमुपालभ्यमानायां तद्व्यलीकशङ्कितप्रतिवेशिकलोकविषयं चाविनयप्रच्छादनेन प्रत्यायनं व्यङ्ग्यम् । तत्सपत्न्यां च तदुपालम्भतदविनयप्रहृष्टायां सौभाग्यातिशयख्यापनं प्रियाया इति शब्दबलादिति सपत्नीविषयं व्यङ्ग्यम् । सपत्नीमध्ये इयता खलीकृतास्मीति लाघवमात्मनि ग्रहीतुं न युक्तं, प्रत्युतायं बहुमानः, सहस्व शोभस्वेदानीमिति सखीविषयं सौभाग्यप्रख्यापनं व्यङ्ग्यम् । अद्येयं तव प्रच्छन्नानुरा-गिणी हृदयवल्लभेत्थं रक्षिता पुनः प्रकटरदनदंशनविधिर्न विधेय इति तच्चौर्यकामुकविषयसम्बोधनं व्यङ्ग्यम् । इत्थं

मयैतदपह्नुतमिति स्ववैदग्ध्यख्यापनं तटस्थविदग्धलोकविषयं व्यङ्ग्यमिति ।

लक्ष्यार्थेन व्यङ्ग्यार्थस्य द्वितीयो भेदो यथा–

अत्ता एत्थ णिमज्जइ एत्थ अहं दिअहए पलोएहि ।
मा पहिअ! रत्तिअन्धअ! सेज्जाए मह णिमज्जहिसि ॥[7]

मह इति निपातोऽनेकार्थवृत्तिरत्रावयोरित्यर्थे न त ममेति। एवं हि विशेषवचनमेव शङ्काकारि भवेदिति प्रच्छन्नाभ्युपगमो न स्यात्। कांचित्प्रोषितपतिकां तरुणीमवलोक्य प्रवृद्धमदनाङ्कुरः सम्पन्नः पान्थोऽनेन निषेधद्वारेण तयाभ्युपगत इति निषेधाभावोऽत्र विधिः न तु निमन्त्रणरूपोऽप्रवृत्तप्रवर्त-नास्वभावः सौभाग्याभिमानखण्डनाप्रसङ्गात्। अत एव रात्र्यन्धेति समुचितसमयसम्भाव्यमानविकारा-कुलितत्वं ध्वनितम्। भावतदभावयोश्च साक्षाद्विरोधाद्वाच्याद्व्यङ्ग्यस्य स्फुटमेवान्यत्वम्। अथ यद्यपि भवान्मदनशरासारदीर्यमाणहृदय उपेक्षितुं न युक्तः तथापि किं करोमि पापो दिवसकोऽयमनुचितत्वात्कु-त्सितोऽयमित्यर्थः। न च सर्वथा त्वामुपेक्षे, यतोऽत्रैवाहं तत्प्रलोकय नान्यतोऽहं गच्छामि। तदन्योन्यव-दनावलोकनविनोदेन दिनं तावदतिवाहयाव इत्यर्थः। प्रतिपन्नमात्रायां च रात्रावन्धीभूतो मदीयायां शय्यायां मा श्लिषः, अपि तु निभृतनिभृतमेवात्ताभिधाननिकटकण्टकनिद्रान्वेषणपूर्वकमितीयदत्र ध्वन्यते।

काव्यशास्त्रे सुतरां प्रसिद्धमिदं पद्यं कामप्यनिर्वचनीयां विच्छित्तिं धत्ते। प्राकृतस्येदमेव वैशिष्ट्यं यद् भावबोधः, अर्थसङ्गतिः, व्यङ्ग्यचमत्कारश्चात्र विशिष्येण द्योत्यते। प्राकृतस्येकमपि पद्यं तादृशं नास्ति यत्र कवेरनल्पना विलासः, नवनवोन्मेषस्य प्रथा, रसानुगुणो विन्यासश्च न स्यात्। प्राकृतभाषायां कवेरुद्दामकवित्वशक्तिरप्रतिहतरूपेण पदे-पदे दृग्गोचरीभवतीति विद्यावैभवसंवलितानां कोविदकुलकुमु-दकलाधराणां चिन्तक्रमः।

लक्ष्यार्थव्यङ्ग्यार्थयोः सम्बद्धसम्बन्धस्योदाहरणं यथा–

विपरीअरए लच्छी ब्रह्मं दठ्ठूण णाहिकमलठ्ठं ।
हरिणो दाहिणणअणं रसाउला झत्ति ढक्कइ ॥[8]

अत्र हि हरिपदेन दक्षिणनयनस्य सूर्यात्मकता व्यज्यते, तन्निमीलनेन सूर्यास्तमयः, तेन पद्मस्य सङ्कोचः, ततो ब्रह्मणः स्थगनम्, तत्र सति गोप्याङ्गस्यादर्शनेन अनिर्यन्त्रणं निधुवनविलसितमिति । व्यञ्जनाया अनुमानेऽन्तर्भावं प्रदर्शयन्नुदाहरणं प्रस्तौति—

भम धम्मिअ वीसद्धो सो सुणओ अज्ज मारिओ तेण ।

गोलाणईकच्छकुडंगवासिणा दरिअसीहेण ॥[9]

कस्याश्चित्सङ्केतस्थानं जीवितसर्वस्वायमानं धार्मिकसञ्चरणान्तरायदोषात्तदवलप्यमानपल्लवकु-सुमादिविच्छायीकरणाच्च परित्रातुमियमुक्तिः । तत्र स्वतः सिद्धमपि भ्रमणं श्वभयेनापोदितमिति प्रतिप्रसवात्मको निषेधाभावरूपः, न तु नियोगः, प्रैषादिरूपोऽत्र विधिः । स एव निकुञ्जभ्रमणायो-ग्यतानुमित्यै प्रभवति । यद्यद्भीरुभ्रमणं तत्तद्भयकारणनिवृत्त्युपलब्धिपूर्वकम् । निकुञ्जे च सिंहोपलब्धि-रिति व्यापकविरुद्धोपलब्धौ पर्यवसनाद्भ्रमणस्य व्यापिका भयकारणाभावोपलब्धिः प्रतीता । तद्विरुद्धं यद्भयकारणं तदुपलब्धेः । अनुमानञ्चात्र इदं गोदावरीनिकुञ्जं श्वभीरुभ्रमणायोग्यं सिंहवत्त्वादिति । अत्रोच्यते— श्वभीरोरवीरस्वभावस्य भ्रमणायोग्यत्वमत्र साध्यं वीरस्वभावस्य वा । विशेषौदासीन्येन तत्सामान्यस्यैव वा आद्ये व्यभिचारः । प्रभोर्गुरो वा निदेशेन प्रियानुरागेण निधिलाभादिशङ्कया वा तादृशस्यापि तत्र भ्रमणदर्शनात् । अत एव नान्त्योऽपि । मध्यमे तु विरोधः । स्पर्शादिशङ्कया अपौरुषेयतया वा श्वतो बिभ्यतोऽपि मृगयादिकुतूहलेन सिंहवद्देशे वीरस्य भ्रमणात् । किं च पक्षे सिंहसद्भावो न मानान्तरेणावधारितः । किं तु पुंश्चलीवाक्यादवधारितः । न तद्वचनं निश्चायकम् । अर्थेन समं संबन्धानियमात् इत्यनिश्चयरूपा सिद्धिः ।

अत्र व्यक्तिविवेककारो जगाद— **केवलं योऽसौ भ्रमणविधौ हेतुभावेन दृप्तपञ्चाननव्यापारस्तत्रोपात्तः स एव विमृश्यमानः परम्परया धार्मिकस्य तन्निषेधे पर्यवस्यति तयोर्बाध्यबाधकभावेनावस्थानात् । को ह्यनुन्मत्तः कुक्कुरमात्रसद्भावभयात्**

परिहृतभ्रमणस्तत्रैव दृप्तसिंहसद्भावाशङ्कायामपि सविस्रम्भं भ्रमेदित्यनुमेयार्थविश्रान्तिनियमहेतुर्बाध्यबाधकभावोऽस्त्येवात्र विशेषः। अवश्यं चैतदभ्युपगन्तव्यम्। अन्यथा शुक्तिकारजतप्रतीत्योरपि क्रमभाविन्योरेतात्पर्य-नुयोगप्रसङ्गः केन वार्यते। तस्माद् बाध्यबाधकभावावसायकृत एवात्रोत्तरार्थविश्रान्तिनियम इति स्थितम्।[10] अत्रेदमप्याक्षिपति महिमभट्टाचार्यः– **अपि च पूर्वोक्तेऽस्मिन्नुदाहरणे दारुणतरानितरा- नृक्षप्रभृतीन् प्रसिद्धतद्व्याप्यारानपास्य यदेतत् करिकलभकुम्भनिर्भेदैकहेवाकिनः केसरिणः कौलेयकवधाभिधानमौचित्यैकनिकेतनस्य कवेस्तत्र चिरं चिन्तयन्तोऽप्यभिप्रायं न विद्मः। न हि दृप्ततया यत्किञ्चनकारिणोऽन्यस्यापि स्वजातिसमुचितं चरितमपहायाप्रसिद्धमेव किमपि रसभङ्गीरवः कवयो वर्णयितुमाद्रियन्ते किमुत जगद्विदितव्यापारस्य केसरिणः।**[11]

प्राकृतस्य पद्यमिदं संस्कृतकाव्यशास्त्रे भूयिष्ठां चमत्कृतिमादधाति। नैकेषु ग्रन्थेषु पद्यमिदं कविभिः समादरेण समुदाहृत इति महद्गौरवमस्या भाषायाः। भाषायामस्यां यादृशी व्यङ्ग्यार्थप्रतीतिर्भवति न तादृशी कुत्रचित्। इदमेव वैशिष्ट्यमुररीकृत्य प्राकृतपद्यानि प्रति काव्यशास्त्रिणां विदुषां तावद्बहुमानो विलोक्यते। शब्दार्थयोजना, पदसंघटना, उत्कटो भावबोधः, व्यङ्ग्यार्थरमणीयता, रसपरिपाकश्चात्र भाषायामस्यां साक्षात्क्रियन्ते सहृदयहृदयैः।

हतवृत्तदोषस्योदाहरणं यथा–

जं परिहरिउं तीरइ मणअं पि ण सुन्दरत्तणगुणेन।
अह णवरं जस्स दोसो पडिपक्खेहिं पि पडिवण्णो॥[12]

उदाहरणमिदं रसाननुगुणं च वृत्तं यत्र तत् हतवृत्तम् इत्यस्य वर्तते। मात्रावृत्ते स्थानविशेषे गणविशेषयोगस्येदमुदाहरणम्। मानवतीं प्रति दूत्यः समाधानोक्तिरियम्। तथाविधमेतत्कामचेष्टितं यत्सौन्दर्यगुणेन रमणीयतारूपेण गुणेन मनागपि परिहर्तुं न शक्यते। अथ च यस्य दोषः पूर्वोक्तापरिहार्यत्वस्वरूपः प्रतिपक्षैरपि ब्रह्मचर्यादिभिः

केवलं प्रतिपन्नोऽङ्गीकृतः न तु परिहृतः। त्वत्कान्तस्य तु कैव कथेति तस्य दैवादन्यवनितासंगमेऽपि कोपातिशयो न विधेय इति भावः। अत्रार्यायां द्वितीयस्य हरिउं इत्यन्तर्गुरोः सगणस्य तीरइ इति तृतीयस्यादिगुरोर्भगणस्य चाश्रव्यत्वं छन्दःशास्त्रसिद्धम्।

वक्तृप्रतिपाद्यव्यङ्ग्यवाच्यप्रकरणादीनां महिम्ना दोषोऽपि क्वचिद्गुणो भवति। अस्मिन्नेव सन्दर्भे उदाहरणमिदमत्थं प्रदश्र्यते। गर्भितत्वदोषोऽपि क्वचिद् गुणो भवति। यथा—

हुमि अवहत्थिअरेहो णिरंकुसो अह विवेअरहिओ वि।
सिविणे वि तुमम्मि पुणो पत्तिहि भत्तिं ण पसुमरामि॥[13]

कामं प्रतियौवनस्येयमुक्तिरिति केचित्। मलयानिलादिसहचरसंपत्तौ कामं प्रतीयं तरुणोक्तिरि-त्यन्ये। गुरुं प्रति शिष्योक्तिरित्यपरे। अत्र त्वं प्रतीहीति वाक्यगर्थितत्वं दृढप्रत्ययार्थतया गुणो जातः।

अधमप्रकृत्युक्तिषु ग्राम्यत्वं गुणो भवति। उदाहरणं यथा—

फुल्लुक्करं कलमकूरिणिहं वहंति जे सिन्धुवारविडवा मह वल्लहा दे।
जे गालिदस्स महिसीदहिणो सरिच्चा दे किं च मुद्धविअइल्लपसूणपुंजा॥[14]

राजशेखरविरचितस्य कर्पूरमञ्जरीसट्टकस्य पद्यमिदं वर्तते। अत्र विदूषकोक्तौ कलमभक्तमहि-षीदधिशब्दा ग्राम्या अपि गुणतामेव प्रस्फुटन्ति।

अर्थान्तरसङ्क्रमितध्वनौ कथितपदत्वदोषो न भवतीति विषयमुल्लिखति स्पष्टतया मम्मटाचार्यः— अस्योदाहरणं यथा—

ताला जाअंति गुणा जाला दे सहिअएहि घेप्पन्ति।
रइकिरणाणुग्गहिआइं होन्ति कमलाइं कमलाइं॥[15]

विषमबाणलीलायामागतमिदं पद्यम्। भवन्ति कमलानि कमलानि इत्यत्र कमलानि इति द्वितीये सौरभसौन्दर्यादिविशिष्टकमलमित्यस्य विशिष्टार्थस्य बोधकत्वादत्रार्थान्तरसङ्क्रमितवाच्यध्वनिः वर्तते। अतोऽत्र पुनरुक्तिर्नास्ति।

प्रतिकूलानुभावपरिग्रहे दोषो भवति रसस्य । अस्योदाहरणमित्थं दर्श्यते–

णिहुअरमणम्मि लोअणपहम्मि पडिए गुरुअणमज्झम्मि ।

सअलपरिहारहिअआ वणगमणं एव्व महइ वहू ॥[16]

अत्र सकलपरिहारवनगमने उभावपि शृङ्गाररसविरोधिशान्तरसस्यानुभावौ स्तः । अत्र एतावपि द्वौ प्रकृतस्य विप्रलम्भशृङ्गारस्य प्रतीतौ बाधकौ स्तः। परन्तु इन्धनाद्यानयनव्याजेनोपभोगार्थं वनगमनं चेत् न दोषः ।

भाषाश्लेषसन्दर्भे संस्कृतप्राकृतयोर्द्वयोः अर्थोऽत्र संगच्छते । आचार्यानन्दवर्धनप्रणीतदेवीशतके पद्यमिदमागतमस्ति । पद्यमिदं यथा–

महदेसुरन्धम्मे तमवसमासङ्गमागमाहरणे ।

हरबहुसरणं तं चित्तमोहमवसरउमे सहसा ॥[17]

महदे! गौरी! आगमाहरणे वेदविद्योपार्जनानुरागं समासङ्गं सामञ्जस्यं कुरु । चित्तस्याज्ञानं सपदि अपसरतु मे सहसा ।

संस्कृतार्थोऽयम्– हे हरवधू पार्वती! त्वमेका शरणं मम । सर्वदा मे प्रीतिः धर्मे स्यात् तथा तमोवशां तमोगुणायत्ताम् गमागमात्संसारात् शरणं त्वं भवसीति शेषः ।

वाक्यगार्थी- उपमानलुप्ताया उदाहरणमिदं यथा–

सअलकरणपरवीसामसिरिविअरणं ण सरसकव्वस्स ।

दीसइ अह व णिसम्मइ सरिसं अंसंसमेत्तेण ॥[18]

काव्यं भवत्यत्रोपमेयम्, उपमानं नोच्यते, सकलकरणपरविश्रामश्रीवितरणसाधारणधर्मोऽयम् । सदृशञ्चोपमावाचकं पदमिदम् । इदमेव कव्वस्स इत्यत्र कव्वसमम्, सरिसं इत्यत्र णूणं इति पाठेतस्मात् समासगाया उदाहरणमिदं वर्तते । समासगा द्विलुप्तोपमाया इदमुदाहरणं द्रष्टव्यम्, यथा–

टुण्टुण्णन्तो मरिहसि कण्टअकलिआइं केअइवणाइं ।

मालइकुसुमरिच्छं भमर! भमन्तो पाविहिसि ॥[19]

अत्र मालतीकुसुममुपमेयम्, सदृश इत्युपमावाचको शब्दः। साधारणधर्मोपमानयोः प्रयोगोऽत्र न भवतः। तस्माद् द्विलुप्ताया उदाहरणमिदम्। मालतीकुसुमसदृशम् एकदेशविवर्तिरूपकस्योदाहरणम् इदं यथा–

जरस रणन्तेउरए करे कुणन्तस्स मण्डलग्गलअम्।

रससंमुही वि सहसा परंमुही होइ रिउसेणा ॥[20]

अत्र रणस्यान्तःपुरत्वमारोप्यमाणं शब्दोपात्तम्। मण्डाग्रलतायाः नायिकात्वम्। रिपुसेनायाश्च प्रतिनायिकात्वम् अर्थसामर्थ्यादवसीयते इत्येकदेशे विशेषेण वर्तनादेकदेशविवर्ति। प्रकृतार्थप्रतिपाद-कवाच्येन श्लिष्टविशेषणमाहात्म्यात्, न तु विशेषस्य सामर्थ्यादपि, यद् अप्रकृतार्थस्याभिधानं सा समासेन संक्षेपेणार्थद्वयकथनात् समासोक्तिर्भवति। अस्योदाहरणं यथा–

लहिऊण तुज्झ बाहुप्फंसं जीए स को वि उल्लासो।

ज अलच्छी तुह विरेह ण हूज्जला दुव्वला णं सा ॥[21]

अत्र विशेष्यवाचिनो जयलक्ष्मीशब्दस्य परमप्रकृतार्थकत्वं नास्ति। अत्र बाहुस्पर्शलाभप्रयुक्तो-ल्लासादिसाधारणविशेषणबलाज्जयलक्ष्मी वृत्तान्तो नायिकावृत्तान्तरूपतया गम्यत इति।

अतिशयोक्त्यालङ्कारस्य द्वितीयभेदे प्रस्तुतस्यार्थस्यान्यरूपेण भेदो निश्चीयते। समानजातीयं वस्तु तद्भिन्नासमानजातीयमित्युच्यते भेदेऽस्मिन्। यथा-

अण्णं लडहत्तणअं अण्णा विअ का वि वत्तणच्छाआ।

सामा समाण्णपआवइणो रेह च्चिअ ण रोई ॥[22]

अत्र लोकप्रसिद्धस्य सौन्दर्यस्य शरीरकान्तेश्च वर्णनमलौकिकरीत्या कविनाकारि। निर्माणपरि-पाटी रेखामात्रेणापि नास्तीति भावः। इयमन्यत्ववर्णनरूपातिशयोक्तिः।

दीपयति अप्रस्तुतमपि पदार्थं बुद्धौ प्रकाशयति अर्थात् सुन्दरीकरोतीति दीपकः। वस्तुतः प्राकरणिकाप्राकरणिकानामर्थादुपमानोपमेयानां धर्मः क्रियादिः एकवारमेव यदुपादीयते तत् एकस्थस्यैव समस्तवाक्यदीपनाद् दीपकमिति। अयमपि कश्चन अर्थोऽस्य– एकस्थस्यैव सर्ववाक्यप्रकाशत्वेन दीपसाम्याद्दीपकमित्यर्थः। अस्योदाहरणं यथा–

किवणाणं धणं णाआणं फणमणी केसराईं सीहाणं।

कुलवालिआणं त्थणआ कुत्तो छिप्पन्ति अमुआणं॥[23]

अत्र वर्ण्यत्वेन प्रकृतानां कुलवधूस्तनानां तदुपमानत्वेनाप्रकृतानामन्येषां च कुतः संस्पृश्यन्त इति सकृद्धर्मोपानाद्दीपकालङ्कारः। श्लोकस्यास्य यादृशो भाव आस्ते स नितान्तं हृदयग्राही वर्तते। स्फुटा भाषा, रसपरिपाकः सरसा मधुरिमा चास्य पद्यस्य रञ्जयन्ति मनांसि सचेतसाम्। सर्वमेतत्प्राकृतस्यैव चमत्कारः।

विवक्षितस्य प्राकरणिकत्वादनुपसर्जनीकार्यस्य अशक्यवक्तव्यमतिप्रसिद्धत्वं वा विशेषं वक्तुं निषेध इव यः स वक्ष्यमाणविषय उक्तविषयश्चेति द्विधा आक्षेपो भवति। तत्र प्रथमस्याक्षेपस्य निदर्शनं यथा–

ए एहि किपि कीएवि कएण णिविवव भणामि अलमहवा।

अविआरिअकज्जारंभआरिणी मरउ ण भणिस्सम्॥[24]

वक्ष्यमाणविषयकस्याक्षेपस्योदाहरणमिदम्। अत्र वियोगिन्या नायिकायाः काचित् सखी नायकमन्तिके सन्देशं गृहीत्वा आगता वर्तते। परन्तु तस्य नायकस्य दशामकथयित्वैव पूर्वमेव सा निषेधयति। अत्र विरहदुर्दशातिशयो वक्ष्यमाणो वक्तुमशक्यतया निषिद्ध इत्याक्षेपालङ्कारः। यत्र सहार्थ-बलादेकार्थाभिधायकमपि यत् उभयस्याप्यवगमकं सा सहोक्तिः। यत्र येषां वस्तूनां सहभावो वर्ण्यते तत्र तेष्वेकं प्रधानम् अपरञ्चाप्रधानं भवति। सहयुक्तेऽप्रधाने इत्यस्मिन् पाणिनीयसूत्रे अप्रधाने तृतीया प्रधाने च प्रथमाविभक्तेः निर्देशो वर्तते।

यथा पुत्रेण सहागतः पिता अत्र पिता वर्तते प्रधानः, अप्रधानश्च पुत्रः। अतः

पुत्रेण इत्यत्र तृतीया, पिता इत्यत्र प्रथमाविभक्तिः। अत्र आगतः इत्यस्याः क्रियायाः साक्षादन्वयो भवति। पुत्रेण इत्यनेन पदेन नैव। अतोऽत्र आगतः पदमिदम् एकार्थसम्बद्धम् एकार्थाभिधायी वर्तते। परन्तु सह इत्यस्मात्पदसामर्थ्यात् पुत्रशब्देन सह तस्य गौणसम्बन्धः कथ्यते। तस्मादयं द्विवाचको भवति। इत्थं यत्र सहशब्दप्रयोगेन काव्योचितचमत्कारविशेषः प्रतीयते तत्र सहोक्तिरलङ्कारः। अस्योदाहरणं यथा प्राकृतनिबद्धं पद्यमिदम्—

सह दिअहणिसाहिं दीहरा सासदण्डा सह मणिवलयेहि वाप्पधारा गलन्ति।

तुह सुहअ विओए तीअ उव्विग्गिरीए सह अ तणुलदाए दुव्वला जीविदासा॥[25]

अत्र श्वासदण्डेषु दीर्घत्वान्वयः शाब्दो विशेषतौ दिवसनिशादौ साहित्यप्रतीत्या आर्थ इत लक्षणसंगतिः। दिवसादिभिस्तु सहान्वयबलात्।

पर्यायोक्तालङ्कारप्रसङ्गे विषमबाणलीलायामागतमिदमुदाहरणं नितान्तमास्ते। वस्तुत एकं वस्तु क्रमेणानेकस्मिन् भवति क्रियते वा स पर्यायो भवति। एकमनेकस्मिन् क्रियते अर्थात् एकं वस्तु क्रमेण अनेकस्मिन् क्रियते। अस्योदाहरणं यथा—

तं ताण सिरिसहोअररअणाहरणंमि हिअअमेक्करसम्।

बिम्बाहरे पिआणं णिवेसिअं कुसुमबाणेण॥[26]

अत्र श्रीसहोदररत्नाहरणे इत्यस्मिन् स्थाने श्रीसहोदररत्नाभरणे अयमपि पाठः कुत्रचिल्लभ्यते। श्रीसहोदररत्नं कौस्तुभ आभरणं यस्य तस्मिन् श्रीविष्णौ। हृदयं कुसुमबाणेन प्रियाणां कान्तानां बिम्बसदृशेऽधरे विनिवेशितमित्यनेकत्र स्थितौ प्रयोजकनिर्देशाद्भेदः। न भवति प्राकृतभाषायां लिङ्गव-चनयोः कश्चन नियमः। अत्र राक्षसाणां मनः प्राक् कौस्तुभमणिमवाप्तये समुत्सुकम् आसीदथवा विष्णोः स्वरूपे तत्परमासीत्। अधुना तन्मनो मोहिन्या बिम्बाधरासक्तमजायदिति पर्यायालङ्कारोऽत्र। अर्थयोरे-कक्रियामुखेन परस्परं कारणत्वे सति अन्योन्यनामालङ्कारः। अस्योदाहरणं यथा—

हंसाणं सरेहिं सिरी सारिज्जइ अह सराण हंसेहिं ।
अण्णोण्णं विंअ एए अप्पाणं णवर गरुअन्ति ॥[27]

अत्र सरोहंसयोः परस्परं शोभासारीकरणरूपोपकारजनकत्वादन्योन्यं नामालङ्कारः । उत्तर-श्रुतिमात्रेण यत्र प्रश्नकल्पना क्रियते तथा च यत्र प्रश्ने सत्यसकृदसम्भाव्यमुत्तरं स्यात् तदुत्तरालङ्कारो भवति । प्रतिवचनोपलम्भादेव पूर्ववाक्यं प्रश्नो वा यत्र कल्प्यते तदेकं भवति तावदुत्तरम् । यथा–

वाणिअअ हत्थिदन्ता कुत्तो अम्हाणं वग्धकित्ती अ ।

जाव लुलितासअमुही धरस्मि परिसक्कए सोण्हा ॥[28]

हस्तिदन्तव्याध्रकृत्तीनामहमर्थी ता मूल्येन प्रयच्छेति क्रेतुर्वचनम् अमुना वाक्येन समुन्नीयते । प्रश्नादनन्तरं लोकातिक्रान्तगोचरतया यदसम्भाव्यरूपं प्रतिवचनं स्यात्तदपरमुत्तरम् । अनयोश्च सकृदु-पादाने न चारुताप्रतीतिरित्यसकृदित्युक्तं यथा–

का विसमा देव्वगई किं लद्धं जं जणो गुणग्गाही ।

किं सोक्खं सुकलत्तं किं दुक्खं जं खलो लोओ ॥[29]

अत्र दैवगत्यादेर्वैषम्यादि लोकप्रसिद्धमेव प्रकाशते । वाच्यार्थ एवात्र विश्रान्तिः विलोक्यते ।

यद्देशं कारणं तद्देशमेव कार्यमिति नयः । यत्र धूमः तत्र वह्निः । यत्र तु कार्यकारणभूतयोर्द्वयोर्ध-र्मयोः केनाऽप्यतिशयेन नानादेशतया युगपदवभासनम्, सा तयोः स्वभावोत्पन्नपरस्परसङ्गतित्यागाद-सङ्गतिः नाम अलङ्कारो भवति । अस्योदाहरणमित्थं प्रदर्श्यते–

जस्सेअ वणो तस्सेअ वेअणा भणइ तं जणो अलिअं ।

दणतक्खअं कवोले बहूए वेणआ सवत्तीणं ॥[30]

अत्र शारीरमानसयोर्वेदनयोरेकत्वाध्यवसायो मूलम् । अत्र वेदनादन्तक्षतयोः कार्यकारणयोर्वैय-धिकरण्यरूपासंगतिरलङ्कारः । वैयधिकरण्येन प्रतीतिबलाद्यत्र

समानाधिकरणानां धर्माणां प्रतीत्या विरोधस्वीकरणं भवति तत्रैवासङ्गतिः ।

यः पदार्थः केनचिदाकारेण नियतो यदा कदाचिदनुभूतोऽभूत्, स कालान्तरे स्मृतिप्रतिबोधाधा-यिनीति तत्समाने वस्तुनि दृष्टे सति यत्तथैव स्मर्यते। तद्भवेत्स्मरणमिति । यथा–

करजुअगहिअजसोआत्थणमुहविणिवेसिआहरपुडस्स ।

सम्भरिअपञ्चजण्णस्य णमह कण्हस्स रोमाञ्चं ॥[31]

अत्र जन्मान्तरानुभूतस्मरणमिति ।

उपमानस्य यत्र व्यर्थतायाः प्रतिपादनं क्रियते अर्थात् अस्य धुरं सुतरामुपमेयमेव वोढुं प्रौढमिति कैमर्थ्येन यदुपमानामाक्षिप्यते तत्र भवति प्रतीपालङ्कारः। यदपि तस्यैवोपमानतया प्रसिद्धस्य उपमाना-न्तरविवक्षयाऽनादरार्थमुपमेयभावः कल्प्यते, तदुपमेयस्योपमानप्रतिकूलवर्तित्वादुभयरूपं प्रतीपम् ।

द्वितीयस्य प्रतीपस्योदाहरणं यथा–

ए एहि दाव सुन्दरि कण्णं दाऊण सुणसु वअणिज्जम् ।

तुज्झ मुहेण किसोअरि चन्दो उअमिज्जइ जणेण ॥[32]

अत्र मुखेनोपमीयमानस्य शशिनः स्वल्पतरगुणत्वात् उपमित्यनिष्पत्त्यां वअणिज्जम् इति वचनीयपदाभिव्यङ्ग्यतिरस्कारः ।

यत्र एकमपि वस्तु यत् एकेनैव स्वभावेन युगपदनेकत्र भवति तत्र द्वितीयो विशेषालङ्कारो भवति- अस्योदाहरणं यथा–

सा वसइ तुज्झ हिंअए सा च्चिंअ अच्छीसु सा अ वअणेसु ।

अह्मारिसाण सुन्दर ओअसो कत्थ पावाणं ॥[33]

अत्रैकस्याः कामिन्या एकरूपेण युगपदनेकत्र स्थितिवर्णनादपरो भेदः। अत्युज्ज्वलगुणयोगेऽपि यदि न्यूनगुणोऽप्रकृतः प्रकृतस्य गुणं नानुहरति तदा

अतद्गुणालङ्कारो भवति । निदर्शनं यथा–

धवलोऽसि जहवि सुन्दर तहवि तुए मज्झ रज्जिअं हिअअं ।

राअभरिए वि हिअए सुहअ णिहित्तो ण रत्तोसि ॥[34]

अत्रोत्तरार्धेऽप्रस्तुतेन गायकेन निवेदनीयवृत्तान्ततया प्रकृतस्य हृदयस्य गुणाननुहरणादतद्गु-णोऽलङ्कारः ।

यत्र नैकेऽलङ्काराः परस्परं निरपेक्षरूपतया स्थिता भवन्ति तत्र संसृष्टिः । शब्दार्थालङ्कारयोः संसृष्टिर्यथा–

सो णत्थि एत्थ गामे जो एअं महमहन्तलाअण्णं ।

तरुणाण हिअअलूडिं परिसक्कन्तीं णिवोरेइ ॥[35]

अत्र "णत्थि एत्थ " इत्यत्र त्थ इत्यस्यानुप्रासः पुनश्चोत्तरार्द्धे हिअअलूडिं(हृदयलुण्ठाकीम्) अत्र रूपकालङ्कारो वर्तते। संसृष्टिश्च तयोरेकत्र वाक्ये छन्दसि वा समवेतत्वात् ।

द्वयोर्बहूनां वा अलङ्काराणामेकत्र समावेशेऽपि विरोधान्न यत्र युगपदवस्थानं न चैकतरस्य परिग्रहे साधकं तदितरस्य वा परिहारे बाधकमस्ति येनैकतर एव परिगृह्येत स निश्चयाभावरूपो द्वितीय सङ्करः सन्देहसङ्करो भवति ।यथा–

जह गहिरो जह रअणणिब्भरो जह अ णिम्मलच्छाओ ।

तह किं विहिणा एसो सरसवाणीओ जलविहीण किओ ॥[36]

अत्र किं समुद्रे श्लिष्टविशेषणमहिम्नाप्रस्तुतपुरुषविशेषप्रतीतेरियं समासोक्तिः, किं वाब्धेरप्रस्तु-तात्प्रस्तुतस्य पुरुषविशेषस्य तत्समानगुणतया प्रतिपत्तेरप्रस्तुतमिति संदेहः । तस्मादत्रायं द्वयोः सङ्करः ।

इत्थमियं भाषा गौरवस्य सौष्ठवस्य माधुर्यस्य सौभाग्यस्य औदार्यस्य गाम्भीर्यस्य नैर्मल्यस्य मार्दवस्य चाधिष्ठानवनीति सप्रमोदमुपच्छन्दिता, हृदयपरिष्करणाय चाप्रतिद्वन्द्वं प्रभुरिति सत्यतमनि-न्दिता चेति नात्र विस्तारयितुमावश्यकम्। भाषायामस्यां महतीं

प्रीतिं प्रदर्शयन् राजानको मम्मटः प्राकृतप्रियः इति नाम्ना कविकुले प्रसिद्धिमवाप। धन्येयं भाषा, धन्यश्च प्राकृतप्रियो मम्मटः, धन्याश्च प्राकृतपाठकाः ।

पादटिप्पणी

1. नवमर्थदर्शनं सन्निवेशशिशिरा बन्धर्द्धयः ।
अविरलमेतदाभुवनबन्धमिह केवलं प्राकृते ॥ गउडवहो

2. गूढार्थदेशरहितं सुललितवर्णैविरचितं रम्यम् ।
प्राकृतकाव्यं लोके कस्य न हृदयं सुखयति ॥
पञ्चमीमाहात्म्यम्(महेश्वरसूरिः)

3. पुरुषाः संस्कृतबन्धाः प्राकृतबन्धोऽपि भवति सुकुमारः ।
पुरुषमहिलानां यावदिहान्तरं तावदेतेषाम् ॥ कर्पूरमञ्जरी

4. ललिते मधुराक्षरे युवतिजनवल्लभे सशृङ्गारे ।
सति प्राकृतकाव्ये क शक्नोति संस्कृतं पठितुम् ॥ वज्जालग्ग

5. वानीरकुञ्जोड्डीन शकुनिकोलाहलं शृण्वन्याः ।
गृहकर्मव्यापृताया वध्वाः सीदन्त्यङ्गानि ॥ काव्यप्रकाशः, 5/132

6. कस्य वा न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम् ।
सभ्रमरपद्माघ्रायिणि वारितवामे सहस्वेदानीम् ॥ तत्रैव, 5/135

7. श्वश्रूरत्र निमज्जति अत्राहं दिवसके प्रलोकय ।
मा पथिक रात्र्यन्ध शय्यायां मम निमंक्ष्यसि ॥ तत्रैव, 5/136

8. विपरीतरते लक्ष्मीर्ब्रह्माणं दृष्ट्वा नाभिकमलस्थम् ।
हरेर्दक्षिणनयनं रसाकुला झटिति स्थगयति ॥ तत्रैव, 5/137

9. भ्रम धार्मिक विश्वस्तः स शुनकोऽद्य मारितस्तेन ।
गोदानदीकच्छकुञ्जवासिना दृप्तसिंहेन ॥ तत्रैव, 5/138

10. व्यक्तिविवेकः, ध्वनिखण्डनप्रसङ्गे

11. तदेव

12. यत् परिहर्तुं तीर्यते मनागपि न सुन्दरत्वगुणेन ।
अथ केवलं यस्य दोषः प्रतिपक्षैरपि प्रतिपन्नः ॥
काव्यप्रकाशः,7/217

13. भवाम्यपहस्तितरेखा निरङ्कुशोऽथ विवेकरहितोऽपि ।
स्वप्नेऽपि त्वयि पुनः प्रतीहि भक्तिं न प्रस्मरामि ॥ तत्रैव, 7/321

14. पुष्पोत्करं कलमभक्तनिभं वहन्ति
ये सिन्धुवारविटपा मम वल्लास्ते ।
ये गालितस्य महिषीदध्नः सदृक्षास्ते
किं च मुग्धविचकिलप्रसूनपुञ्जाः ॥ तत्रैव, 7/310

15. तदा जायन्ते गुणा यदा ते सहृदयैर्गृह्यन्ते ।
रविकिरणानुगृतीतानि भवन्ति कमलानि कमलानि ॥
तत्रैव, 7/316

16. निभृतरमणे लोचनपथे पतिते गुरुजनमध्ये ।
सकलपरिहारहृदया वनगमनेवेच्छति वधूः ॥ तत्रैव, 7/329

17. मम देहि रसं धर्मे तमोवशाम् आशां गमागमात् हर नः ।
हरबधु शरणं त्वं चित्तमोहोऽपसरतु मे सहसा ॥तत्रैव, 9/373

18. सकलकरणपरविश्रामश्रीवितरणं न सरसकाव्यस्य ।
दृश्यतेऽथवा निशम्यते सदृशमशांशमात्रेण ॥
तत्रैव,10/401

19. टुण्टुणायमानो मरिष्यसि कण्टककलितानि केतकीवनानि ।

मालतीकुसुमसदृशं भ्रमर भ्रमन् न प्राप्स्यसि ॥तत्रैव, 10/408

20. यस्य रणान्तःपुरे करे कुर्वतो मण्डालाग्रलताम् ।

रससम्मुख्यापि सहसा पराङ्मुखी भवति रिपुसेना ॥तत्रैव, 10/423

21. लब्ध्वा तव बाहुस्पर्शः यस्याः स कोऽप्युल्लासः ।

जयलक्ष्मीस्तव विरहे न खलूज्ज्वला दुर्बला ननु सा ॥ तत्रैव, 10/435

22. अन्यत् सौकुमार्यमन्यैव च कापि वर्तनच्छाया ।

श्यामा सामान्यप्रजापतेः रेखैव च न भवति ॥तत्रैव, १०/४५१

23. कृपणानां धनं नागानां फणमणिः केसराः सिंहानाम् ।

कुलबालिकानां स्तनाः कुतः स्पृश्यन्तेऽमृतानाम् ॥तत्रैव, 10/458

24. ए एहि किमपि कस्या अपि कृते निष्कृप! भणामि अलमथवा ।

अविचारितकार्यारम्भकारिणी म्रियतां न भणिष्यामि ॥ तत्रैव, 10/472

25. सह दिवसनिशाभिः दीर्घाः श्वासदण्डाः

सह मणिवलयैर्वाष्पधारा गलन्ति ।

तव सुभग! वियोगे तस्या उद्विग्नायाः

सह च तनुलतया दुर्बला जीविताशा ॥तत्रैव, 10/496

26. तत्तेषां श्रीसहोदररत्नाहरणे हृदयमेकरसम् ।

बिम्बाधरे प्रियाणां निवेशितं कुसुमबाणेन ॥तत्रैव, 10/516

27. हंसानां सरोभिः श्रीः सार्यतेऽथ सरसां हंसैः ।

अन्योन्यमेवैत आत्मानं केवलं गुरूकुर्वयन्ति ॥ तत्रैव, 10/528

28. वाणिजक! हस्तिदन्ताः कुतोऽस्माकं व्याघ्रकृत्तयश्च ।

यावत् लुलितालकमुखी गृहे परिष्वक्कते स्नुषा ॥तत्रैव, 10/529

29. का विषमा दैवगतिः किं लब्धव्यं यत् जनो गुणग्राही ।

किं सौख्यं सुकलत्रं किं दुःखं यत् खलो लोकः ॥तत्रैव,10/530

30. यस्यैव व्रणस्तस्यैव वेदना भणति तज्जनोऽलीकम् ।

दन्तक्षतं कपोले वध्वा वेदना सपत्नीनाम् ॥तत्रैव, 10/534

31. करयुगगृहीतयशोदास्तनमुखविनिवेशिताधरपुटस्य ।

संस्मृतपाञ्चजन्यस्य नमत कृष्णस्य रोमाञ्चम् ॥तत्रैव, 10/552

32. अयि एहि तावत् सुन्दरि! कर्णं दत्त्वा शृणुष्व वचनीयम् ।

तव मुखेन कृशोदरि! चन्द्र उपमीयते जनेन ॥तत्रैव, 10/555

33. सा वसति तव हृदये सैवाक्षिषु सा च वचनेषु ।

अस्मादृशीनां सुन्दर! अवकाशः कुत्र पापानाम् ॥तत्रैव, 10/561

34. धवलोऽसि यद्यपि सुन्दर! तथापि त्वया मम रञ्जितं हृदयम् ।

रागभरितेऽपि हृदये सुभग! निहितो न रक्तोऽसि ॥ तत्रैव, 10/565

35. स नास्त्यत्र ग्रामे य एनां महमहायमानलावण्याम् ।

तरुणानां हृदयलुण्ठाकीं परिष्वक्कमानां निवारयति ॥ तत्रैव, 10/570

सन्दर्भग्रन्थसूचिः

1. गाथासप्तशती, भट्टश्रीमथुरानाथशास्त्री, मोतीलाल बनारसीदास, दिल्ली, पुनर्मुद्रण, 1983

2. काव्यप्रकाश, आचार्यविश्वेश्वर, ज्ञानमण्डल लिमिटेड, वाराणसी, जून 2005

3. ध्वन्यालोकः, आचार्यजगन्नाथपाठकः, चौखम्बाविद्याभवनम्, वाराणसी, 2011

4. व्यक्तिविवेकः, जयकृष्णदास हरिदासगुप्त, चौखम्बा संस्कृत सीरीज ऑफिस, बनारस, 1936

5. प्राकृतव्याख्यावृत्तिः, श्रीत्रिविक्रमदेवः, जयकृष्णदासहरिदासगुप्ता, चौखम्बा संस्कृत सीरिज ऑफिस, संवत् 2007

6. काव्यप्रकाशः(बालबोधिनीटीका), भट्टवामनाचार्यः, परिमल पब्लिकेशन्स, दिल्ली,2008

7. काव्यप्रकाशः(सोलह टीकाओं सहित), डॉ. ज्योत्स्ना मोहन, नाग प्रकाशक, दिल्ली, प्रथम संस्करण 1995

8. कर्पूरमञ्जरी, पं. दुर्गाप्रसाद तथा वासुदेवलक्ष्मण शास्ती पणशीकरः, निर्णय सागर प्रेस, बोम्वे, 1927

9. ज्ञानपञ्चमीकथाः(श्रीमहेश्वरसूरिकृताः), आचार्य जिनविजयमुनि, भारतीयविद्याभवन, बम्बई, 1949

10. प्राकृत रत्नाकर - प्रो. प्रेम सुमन जैन, प्राकृत अध्ययन एवं संशोधन संस्थान, श्रवणबेलगोला, कर्नाटक, 2012

11. प्राकृत भाषा और व्याकरण के विविध आयाम, प्रो. राधावल्लभ त्रिपाठी,रा.,सं, सं,नव देहली,2010

12.प्राकृत साहित्य की रूपरेखा,डा.तारा डागा,प्राकृत भारती,जयपुर,2006

13.प्राकृत साहित्य का इतिहास,डा.जगदीश चन्द्र् जैन,चौखम्बा विद्या भवन,वाराणसी,1995